तितंसकः-सिका, तातंसकः-सिका; तंसयिता-त्री, तितंसयिषिता-त्री, तंसिता-त्री, तितंसिता-त्री, तातंसिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचपिधातुवत् (499) बोध्यानि। इदित्करणात् णिचो वैकल्पिकत्वं बोध्यम्। घञि—[A]उत्तंसः।

(714) "तसु उपक्षये" (IV-दिवादिः-1212. अक. सेट्. पर.)

'प्रक्षेपे' इति मैत्रेयः।

'तस्यत्युपक्षयार्थे णौ, अलङ्कारे तु तंसयेत्॥' (श्लो. 189) इति देवः। तासकः-सिका, तासकः-सिका, तितसिषकः-षिका, तातसकः-सिका; तसिता-त्री, तासयिता-त्री, तितसिषिता-त्री, तातसिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्रसुधातुवत् (265) बोध्यानि। 'जनीजृष्क्नसु—' (ग. सू. घटादौ) इति मित्त्वं नात्र प्रवर्तते, इति विशेषः। ल्युटि—[B]तसनम्।

(715) "तायृ सन्तानपालनयोः" (I-भ्वादिः-489. सक.सेट्. आत्म.)

सन्तानम्=प्रबन्धः। आद्ये — अकर्मकः। द्वितीये — सकर्मकः। तायकः-यिका, तायकः-यिका, तितायिषकः-षिका, तातायकः-यिका; तायिता-त्री, ताययिता-त्री, तितायिषिता-त्री, तातायिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि कासृधातुवत् (188) ज्ञेयानि। क्विपि—मित्रं तायते रक्षतीति, मित्रताः। वलि लोपे आकारान्तं प्रातिपदिकम्, इति विशेषः। अशेषताम्[C]।

(716) "तिक गतौ च" (V-स्वादिः-1266. सक. सेट्. पर.)

चकारात् 'आस्कन्दने' इति संबध्यते।

---

A. 'आकन्दयत्सु निभृतं नृषु लासिताशेषोत्तंसभूषणविमोक्षणयाहिताभौ।' धा. का. 3. 40.

B. 'अस्तायासविजस्तविश्वतसनो निर्दस्तवासैर्नुतः—
भृश्यद्भ्रंशनवशंकाकृशदयस्तृष्णाहरो हृष्य मे॥' धा. का. 2.66.

C. 'अशेषतां भृशलनैर्वलद्दृशा प्रवलमानं प्रियवल्लवीशुचम्॥' धा. का. 1.63.